दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-209 | 1 | मई 28, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२, कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः सूर्यः उत्तरायणः ज्येष्ठशुक्लद्वितीया ज्येष्ठ 14 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे ब्रॉडबैंडसेवाभिः अत्याधुनिकाः भवन्ति २८०९ ग्रामीणवरिष्ठमाध्यमिकविद्यालयाः

3 भारतीयमहाविद्यालये एकदिवसीया राष्ट्रियगोष्ठी सुसम्पन्ना

4 शैक्षणिकप्रशासनस्य सफलतायै कार्यालयव्यवस्थायाः अनुसरणं आवश्यकम्- डॉ. हरिमोहन आजादः

## प्रधानमंत्री नरेन्द्रमोदी गुजरातस्य गांधी-नगरे सार्ध-पञ्चसहस्र-कोटि रूप्यकाणाम् अनेकासां विकास-परियोजनानाम् उद्घाटनं आधारशिलास्थापनं च विहितवान्



हिमसंस्कृतवार्ताः - प्रधानमंत्री नरेन्द्रमोदी प्रोक्तवान् यत् सद्यस्तनीयैः घटनाक्रमैः सिद्धं भवति यत् पाकिस्तानस्य भारतं विरूद्धं तथाकथित छद्म युद्धम् एकं सुनियोजितं युद्ध-रणनीतिः वर्तते। गुजरातस्य गांधी नगरस्य महात्मा मंदिरे एकं जनसभां संबोधयन् सः प्रोक्तवान् यत् मईमासस्य षड् दिनांकस्य घटनानां पश्चाद् भारतं आतंकी गतिविधीनां प्रमाणयितुं आवश्यकता नास्ति। श्री मोदी प्रोक्तवान् यत् भारतं कश्चिदपि अशान्तिं नैव वाञ्छति। सः प्रोक्तवान् यत् देशः एवं प्रकारेण प्रगति कर्तुम् आकांक्षते यत् विश्वस्य कल्याणे योगदानं प्रदद्यात्। प्रशासनं कोटिशः भारतीयानाम् उत्थानाय पूर्ण मनसा कार्यं कुर्वन् अस्ति। विगत मिथ्या नीतीनां उल्लेखं कुर्वता प्रधानमंत्रिणा युवभ्यः आग्रहः कृतः यत् ते एतादृशानां ऐतिहासिक निर्णयानां अध्ययनं कुर्वन्तु, येन राष्ट्रीय हितानां क्षरणं जातम्। प्रधानमंत्री नरेन्द्रमोदी स्वाधीनतायाः शतवर्षाणां पूर्त्यवसरे विकसितभारतस्य दृष्टिकोणं संप्राप्तुं सर्वविध प्रयासाः क्रियते। अमुं स्वप्नं साकारयितुं प्रत्येकं नागरिकं निज भूमिका निभालयिष्यति। प्रधानमंत्री देशवासिभ्यः भारतीय उत्पादकानाम् उपयोगं कर्तुं प्रेरितवान्। इतः पूर्वं प्रधानमंत्री नरेन्द्रमोदी गांधी नगरस्य महात्मा मंदिरे षट्त्रिंशदुत्तरपञ्चशताधिक पञ्चसहस्र कोटि रूप्यकाणां विकास परियोजनानां उद्घाटनं विहितवान्। एतासु परियोजनासु नागरीय विकासः, आधारभूतसंरचना, जलसंसाधन-प्रबंधनम्, स्वास्थ्य सेवाः राजस्व सेवाः समेत्य नैकानि महत्वपूर्णानि क्षेत्राणि सम्मिलितानि सन्ति।

## प्रत्यक्षकर-केन्द्रीयमण्डलेन-(सीबीडीटी) आयकर-प्रत्यावर्तनाय पञ्जीकरणस्य अन्तिमा तिथिः, अस्मिन् वर्षे एकत्रिंशत् जुलाईतः पञ्चदश सितम्बरपर्यन्तं विस्तारिता

हिमसंस्कृतवार्ताः - प्रत्यक्षकरस्य केन्द्रीयमण्डलेन (सीबीडीटी) आयकर-प्रत्यावर्तनाय पञ्जीकरणस्य अन्तिमा तिथिः, अस्मिन् वर्षे एकत्रिंशत् जुलाईतः पञ्चदश सितम्बरपर्यन्तं विस्तारिता अस्ति। सीबीडीटी इत्यनेन स्वस्य वक्तव्ये उक्तं यत् आई.टी.आर.-रूपेषु महत्त्वपूर्णपुनरीक्षणे, प्रणाल्याः विकास-आवश्यकतायाः, टी.डी.एस.-ऋणप्रतिबिम्बे च एषः विस्तारः जनानां कृते अधिकं समयं प्रदास्यति।

## शारदा सिन्हा, कुमुदिनी रजनीकान्त लखिया च मरणोपरांतः पद्मविभूषणेन पुरस्कृतौ

हिमसंस्कृतवार्ताः - राष्ट्रपतिः द्रौपदी मुर्मुः राष्ट्रपतिभवने द्वितीय-नागरिकालङ्करणसमारोहे पद्मपुरस्काराः प्रददत्तवती। ध्यातव्यं वर्त्तते यत् पद्मपुरस्कारः देशस्य सर्वोच्चनागरिकपुरस्कारेषु अन्यतमः अस्ति, यस्मिन् पद्मविभूषणं, पद्मभूषणं, पद्मश्रीः च त्रयः वर्गाः सन्ति। अस्मिन् वर्षे सर्वकारेण ऊनचत्वारिंशदधिकैकशतं यावत् पद्मपुरस्काराः घोषिताः सन्ति, येषु सप्त पद्मविभूषणं, एकोनविंशतिः पद्मभूषणं, त्रयोदशाधिकैकशतं यावत् पद्मश्रीपुरस्काराः च सन्ति। अस्मिन् वर्षे अष्टषष्टिः प्रख्याताः जनाः पद्मपुरस्कारेण सम्मानिताः। तेषु भारतस्य पूर्वमुख्यन्यायाधीशः जगदीशसिंह खेहरः, कुमुदिनी रजनीकान्त लखिया च मरणोपरांतः पद्मविभूषणेन पुरस्कृतौ।

## पी.वी. सिन्धु एच.एस. प्रणय च सिंगापुर ओपन एकल स्पर्धायाः द्वितीये चक्रे प्रविष्टवन्तौ

हिमसंस्कृतवार्ताः। बैडमिंटन क्रीडायां शीर्ष भारतीयक्रीडिका पी.वी. सिन्धु एच.एस. प्रणय च सिंगापुर ओपन एकल स्पर्धायाः द्वितीये चक्रे प्रविष्टवन्तौ। महिला-एकल-स्पर्धायां सिंगापुरे सिन्धु इत्यनया क्रीडायाः प्रथमे चक्रे कनाडादेशस्य वेन-यू-झांग इत्यमुं एकविंशति-चतुर्दश, एकविंशति-नव इत्यंकान्तरालेन पराजितम्।

## रक्षामंत्रिणा राजनाथ-सिंहेन उन्नत-मध्यम-योधू-विमान-ए.एम.सी.ए. इत्येतं कार्यक्रमं निष्पादनाय स्वीकृतिः प्रदत्ता



हिमसंस्कृतवार्ताः - रक्षामंत्रिणा राजनाथ सिंहेन उन्नत-मध्यम-योधू-विमान- ए.एम.सी.ए. इत्येतं कार्यक्रमं निष्पादनाय स्वीकृतिः प्रदत्ता। अस्य प्रतिरूपस्य उद्देश्यं भारतस्य स्वदेशीय रक्षाक्षमतानां संवर्धनाय, एकस्य सुदृढ़ गृह एयरोस्पेस औद्योगिक पारिस्थितिकी तंत्रस्य विकासः अस्ति। रक्षा मंत्रालयेन उक्तं यत् एतत् उन्नत-मध्यम-योधु-विमानादर्शः विकसित करणाय स्वदेशीय दक्षता, क्षमता इत्येतयोः उपयोगस्य दिशि एकः महत्वपूर्णः पदक्षेपः अस्ति।

## भाजपादलस्य सांसदः रविशंकरप्रसादस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलं फ्रान्सदेशस्य राष्ट्रियराजधान्यां वार्ताहरैः सह मिलितवान्



हिमसंस्कृतवार्ताः - भारतेन सर्वदलीयप्रतिनिधिमण्डलैः विभिन्नदेशानां यात्रां कृत्वा आतङ्कवादविरुद्धं शून्यसहिष्णुतायाः सन्देशः प्रसारितः, अतः वैश्विकस्तरे पाकिस्तानस्य आतङ्कवादस्य समर्थनं निरन्तरं प्रदर्शयति। भाजपादलस्य सांसदः रविशंकरप्रसादस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलं फ्रान्सदेशस्य राष्ट्रियराजधान्यां फ्रांसदेशस्य वार्ताहरैः सह मिलितवान्। उपवेशनानन्तरं श्रीप्रसादः अवदत् यत् आतङ्कवादस्य विषये भारतस्य दृष्टिकोणम् अतीव स्पष्टं वर्तते। सः अवदत् यत् भारतेन अन्तिमविकल्परूपेण सटीकप्रहारः कृतः। भारतेन आतङ्कवादीशिबिरेषु तेषां वायुसेनाप्रतिष्ठानेषु च आक्रमणं कृत्वा अतीव निर्णायकरूपेण प्रतिक्रिया प्रदत्ता। श्रीप्रसादः अवदत् यत् सिन्दूराभियानं सम्प्रति स्थगितम् अस्ति। डीएमके-सांसदः कनिमोझी करुनानिधेः नेतृत्वे अन्यः प्रतिनिधिमण्डलः राष्ट्रियसभायां स्लोवेनिया-देशस्य राष्ट्रियपरिषदः अध्यक्षः मार्क लोट्रिक् इत्यनेन सह मिलितवान्। काङ्ग्रेस- दलस्य सांसदः शशिथरूरस्य नेतृत्वे सर्वदलीय प्रतिनिधिमण्डलं दक्षिणामेरिकादेशस्य 'गुयाना' देशस्य यात्रां कृतवान्। वार्ताहरान् संबोधयन् डॉ. थरूरः अवदत् यत् गुयानादेशेन भारतस्य आतङ्कवादीनां आक्रमणैः स्वस्य रक्षणस्य, प्रभावीरूपेण प्रतिक्रियायाः च कार्याचरणस्य समर्थनं कृतम्। तत्रैव जेडीयू-सांसदः संजयकुमारझा इत्यस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलेन सिङ्गापुरस्य वरिष्ठविदेशकार्याणां गृहराज्य-मन्त्रिणा च सह उपवेशनं कृतम्।

## सुभाषितम्

आचारं कुलमाख्याति,<br>
वपुराख्याति भोजनम्।<br>
वचनं श्रुतिमाख्याति<br>
स्नेहमाख्याति लोचनम्॥

भावार्थः- व्यक्ति के आचरण से उसके कुल का पता चल जाता है शरीर देखकर भोजन का पता चलता है और मनुष्य की वाणी से उसकी योग्यता ज्ञान होता है और दृष्टि से प्रेम की परीक्षा होती है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# हिमाचलप्रदेशे ब्रॉडबैंडसेवाभिः अत्याधुनिकाः भवन्ति २८०९ ग्रामीणवरिष्ठमाध्यमिकविद्यालयाः



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे २८०९ ग्राम्यवरिष्ठमाध्यमिकविद्यालयाः ब्रॉडबैंड्-जालसंपर्केन अत्याधुनिकाः (हाईटेक) भवन्ति। विद्यालयेषु ब्रॉडबैंड्-जालसंपर्कस्य व्यवस्था सुनिश्चेतुं 'समग्रशिक्षा' 'भारतसञ्चारनिगमसीमित' (बीएसएनएल) इत्यनयोः च मध्ये सोमवासरे एकं महत्वपूर्णं संविदम् अभवत्। समग्रशिक्षायाः प्रतिनिधित्वं कुर्वन् राज्यपरियोजनानिदेशकः राजेशः शर्मा च बीएसएनएल-इत्यस्य पक्षतः डीजीएम राजकुमारः च उक्तं सम्बन्धपत्रम् हस्ताक्षरं कृतवन्तौ।एतेन सम्बन्धपत्रेण यत् निर्धारितं, तेन 'फाइबर् टू द होम्' (एफटीटीएच्) इत्यस्य तन्त्रज्ञानस्य माध्यमेन ग्राम्यवरिष्ठविद्यालयेभ्यः जालसंपर्कः प्रदास्यते। राजेशः शर्मा उक्तवान् यत् सहमतिः शैक्षिकक्षेत्रे ऐतिहासिकं पङ्क्तिः इति। सः अवदत् यत् ब्रॉडबैंड्-जालसंपर्केन विद्यालयेषु आईसीटी, सूचना-तन्त्रज्ञानम्, स्मार्ट्-कक्षा इत्यादीनां नवोन्मेषानां प्रभावशाली संचालनं सम्भवः भविष्यति।अस्य प्रकल्पस्य अन्तर्गतं राज्यस्य २८०९ ग्राम्यवरिष्ठमाध्यमिकविद्यालयाः सम्मिलिताः सन्ति। तेषु प्रायः सहस्रं विद्यालयाः पूर्वमेव जालसंपर्कयुक्ताः सन्ति, किन्तु तेषां वर्तमानसंपर्कं अपि ब्रॉडबैंड्-रूपेण उन्नतं भविष्यति। केन्द्रसर्वकारेण स्कूलीशिक्षामंत्रालयं सञ्चारमंत्रालयं च अस्य योजनायाः सक्रियम् सहयोगं ददाति।भारतब्रॉडबैंड्-नेट्वर्क्-लिमिटेड् (भारत्-फाइबर्) इत्यनेन ब्रॉडबैंड्-स्थापनायाः व्ययं च जालसंपर्कस्य मूल्यं च वहिष्यते। मासिकोपयोगशुल्कं केन्द्रसर्वकारतः कम्पोजिट्-ग्राण्ट् रूपेण दीयते। यत्र विद्यालयेषु जालसंपर्कः न अस्ति, तत्र फिजिबिलिटी-प्रतिवेदनं सज्जीकृतं अस्ति। आगामीषु मासेषु तत्रापि जालसंपर्कः सुनिश्चितः भविष्यति।
अस्मिन्नवसरे विद्यालयीयशिक्षानिदेशकः आशीषः कोहली अपि उपस्थितः आसीत्।

## विद्यालयेभ्यः अविरतं तीव्रगतिकं जालसंपर्कं लभ्यते – गुप्ता

बीएसएनएल-हिमाचलस्य सीजीएम अनिलकुमारगुप्तेन उक्तं यत् 'भारत्-नेट्' परियोजनातः देशस्य सम्पूर्णपञ्चायताः ब्रॉडबैंड्-जालसंपर्केन संयोज्यन्ते। हिमाचले अपि प्रायः २०,००० किलोमीटर् दीर्घा आप्टिकल्-फाइबर्-रेखा २१०० कोटिरूप्यकाणां व्ययेन स्थापिता जाता। सः समग्रशिक्षया सह कृतं संविदम् अतीव महत्वपूर्णं इति उक्तवान्, येन विद्यालयेभ्यः अविरतं तीव्रगतिकं ब्रॉडबैंड्-जालसंपर्कं लभ्यते। प्रायः सहस्रं विद्यालयेषु जालसंपर्कः अस्ति, चतुःशतानां विद्यालयानां फिजिबिलिटी-प्रतिवेदनं सज्जीकृतं च अस्ति। शेषेषु विद्यालयेषु अपि शीघ्रं ब्रॉडबैंड्-संपर्कः प्रदास्यते। बीएसएनएल् उत्तमं ब्रॉडबैंड्-जालसंपर्कं च, त्वरितं आन्तर्जालिकशिक्षा( ऑनलैन् )-उपालम्भ-निवारणप्रणालीं च विकसितुं प्रयासं करिष्यति।

## शैक्षिकम्, प्रशासनिकम्, डाटाप्रबन्धनम् च सुगमं भविष्यति

ब्रॉडबैंड्-सुविधया विद्यालयेषु शैक्षिकक्रियाः डिजिटलीकृताः भविष्यन्ति, छात्राणां उपस्थिति-प्रणाली च अभिलेखप्रबन्धनम् च अधिकं प्रभावशाली भविष्यतः। छात्राः टैबलेट्, संगणककक्षः, डिजिटल-ग्रन्थालयः च इत्यादीनां माध्यमेन आन्तर्जालिकशिक्षा (ऑनलाइन्)-शैक्षिकसाधनानां उपयोगं कृत्वा स्वाध्यायं समृद्धं कर्तुं शक्नुवन्ति। एवं ते डिजिटल्-परिक्षायां, अभ्याससामग्रीषु, परियोजनाकार्येषु च लाभं प्राप्स्यन्ति।

# पुलिसाधीक्षकस्य संजीवगान्धी इत्यस्य विरुद्धं याचिता विशेषाधिकार-हननस्य कार्यविधिः, सुधीर शर्मा विधानसभाध्यक्षाय प्रस्तावं प्रेषितवान्






**हिमसंस्कृतवार्ताः- शिमला।**
भारतीय जनता पार्टीति दलस्य विधायकः सुधीरशर्मा शिमलायाः पुलिसाधीक्षकस्य संजीवगान्धी इत्यस्य विरुद्धं विशेषाधिकार- हननस्य प्रस्तावं विधानसभाध्यक्षाय प्रेषितवान्। सः संजीवगान्धीविरुद्धं अवमाननाकार्याणाम् आग्रहं कृतवान्। विधानसभाध्यक्षं कुलदीपसिंहपठानियां प्रति प्रेषितप्रस्तावे सुधीरशर्मा उक्तवान् यत् शिमलापुलिसाधीक्षकः संजीवगान्धी तस्य विरुद्धम् अशोभनाः टिप्पण्यः कृत्वा संतर्जनाम् अयच्छत्। सः जनप्रतिनिधिविरुद्धं मीडियाभिः सह पत्रकारसम्मेलने तस्य विरुद्धं कथितान् आरोपान् कृतवान्। आधिकारिकतया सः एकस्य जनप्रतिनिधिविरुद्धं एतादृशान् आरोपान् कृतवान् यत् जनप्रतिनिधेः प्रतिबिम्बं कलङ्कितवान्। सुधीरशर्मा विधानसभायाः निर्वाचितप्रतिनिधिः धर्मशाला विधानसभाक्षेत्रस्य जनानां प्रतिनिधित्वं कुर्वन्नस्ति इति उक्तवान्। सभापतिं प्रति लिखिते पत्रे सुधीरशर्मा उक्तवान् यत् पुलिसाधीक्षकस्य संजीवगान्धिनः आचरणं तस्य विधायिककार्यस्य निर्वहनस्य अनुचितं हस्तक्षेपं कृत्वा सभायाः अधिकारं पवित्रतां च क्षीणं करोति।
वरिष्ठपुलिसपदाधिकारिणा एतादृश्यः टिप्पण्यः न केवलं तस्य पदस्य अयोग्यता अपि तु प्रत्यक्षतया विशेषाधिकारस्य उल्लङ्घनम्, विधायिकायाः अवमानना च भवन्ति अतः सः विधानसभासभापतिं संजीवगान्धीविरुद्धं विशेषाधिकारस्य उल्लङ्घनप्रस्तावम् स्वीकृत्य सदनस्य नियमानुसारं समुचितकार्याणि आरभतु इति अनुरोधं कृतवान्। तेन एतेन पत्रेण सह मीडियावार्तायाः संकेताः अपि संलग्नाः सन्ति। अवधेयं वर्तते यत् शनिवासरे एकस्मिन् पत्रकारसम्मेलने शिमलायाः पुलिसाधीक्षकः सुधीरशर्मा इत्यस्य अपि संलग्नतां कृतवान् आसीत्, तस्य विरुद्धं अपि केचन आरोपाः कृताः इति कथ्यते। सः अवदत् यत् सुधीरशर्मा उच्चन्यायालयस्य कार्यवाधेः प्रतिवेदनं स्वस्य आभासीयपृष्ठे प्रकाशितवान् यस्य विरुद्धं सः विधि-कार्याणि करिष्यति। अस्मात् पूर्वं सुधीरशर्मा अपि एसपीविरुद्धं आपराधिकप्रकरणं दातुं सूचनां दत्तवान्। अधुना सः विधानसभासभापतिं प्रति अवमाननाकार्याणि कर्तुं आग्रहं कृतवान्।

# Recruitment of nurses

## परिचारिकानियुक्तौ कोरोनाशूरायै प्राथमिकताम् दास्यति सर्वकारः






हिमसंस्कृतवार्ताः - शिमला ।मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः आईजीएमसी शिमला तथा अटल इन्स्टिट्यूट् आफ् मेडिकल सुपर स्पेशलिटी, चमियाना इत्यस्य संकायसदस्यैः सह संवादं कुर्वन् स्वास्थ्यक्षेत्रे भविष्यस्य आह्वानानां विषये विस्तरेण चर्चां कृतवान्। मुख्यमन्त्री उक्तवान् यत् प्रत्येकस्य चिकित्सामहाविद्यालयस्य आवश्यकतानुसारं राज्यसर्वकारः सर्वसम्भवं साहाय्यं करिष्यति। मुख्यमन्त्री उक्तवान् यत् सर्वकारीयस्वास्थ्यसंस्थासु २० वर्षाणाम् अधिकानि यन्त्राणि उपकरणानि च एकवर्षस्य अन्तः प्रतिस्थापयिष्यन्ते। सुपर स्पेशलिटी हॉस्पिटल चमियाना तथा टाण्डा मेडिकल कॉलेज इत्यत्र मासद्वयेन अन्तः रोबोटिक सर्जरी इत्यस्य सुविधा आरभ्यते। सर्वेषु चिकित्सामहाविद्यालयेषु चरणबद्धरूपेण त्रीणि टेस्ला-एमआरआइ-यन्त्राणि अपि स्थापितानि सन्ति । सः अवदत् यत् पूर्वसर्वकाराः स्वास्थ्यसेवापरिष्कारार्थं विशेषं ध्यानं न दत्तवन्तः, यस्मात् कारणात् रोगिणः विविधसमस्यानां सम्मुखीकरणं कुर्वन्ति। वर्तमानसर्वकारेण शिक्षा-स्वास्थ्यक्षेत्रयोः उन्नयनाय प्राथमिकता दत्ता, चिकित्साप्रौद्योगिक्याः कृते १३५० कोटिरूप्यकाणि व्यय्यन्ते । सः अवदत् यत् चिकित्साशास्त्रं कुर्वतां छात्राणां कृते छात्रावासनिर्माणार्थं सर्वकारः धनं प्रदास्यति, रोगिणां कृते अपि च कर्मचारिणां कृते पार्किङ्गसुविधाः सुदृढाः भविष्यन्ति। मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः आधुनिकप्रौद्योगिक्याः उपयोगेन सह स्वास्थ्यविभागे विविधानि रिक्तपदानि पूरयितुं प्रयत्नाः कुर्वन् अस्ति। राज्यसर्वकारः वैद्यपदं पूरयति तथा च परिचारिकाणां नियुक्तौ कोरोनाविभीषिकाकाले ये परिचारिकाः कार्यं कृतवत्यः ताभ्यः प्राधान्यं दीयते। सः अवदत् यत् पैरा मेडिकल स्टाफ् इत्यनेन सह तकनीकीविशेषज्ञानाम् अपि नियुक्तिः क्रियते। वयं अन्ताराष्ट्रीयमानकानुसारं वैद्य-रोगी-अनुपातं नर्स-रोगी-अनुपातं च सुनिश्चितं कुर्मः येन ते उत्तमं कार्यवातावरणं प्राप्तुं शक्नुवन्ति | मुख्यमन्त्री उक्तवान् यत् अद्य राज्यस्य प्रीमियमस्वास्थ्यसंस्थाः केवलं रेफरलस्वास्थ्यसंस्थाः एव अभवन्, अतः तेषु व्यापकपरिष्कारस्य आवश्यकता वर्तते। राज्यसर्वकारेण १०० कोटिरुप्यकाणि व्ययितानि सन्ति। तस्य उन्नयनार्थं आगामिसमये २०० कोटिरूप्यकाणि प्रदत्तानि भविष्यन्ति।सः अवदत् यत् सर्वकारीयकर्मचारिभ्यः पुरातनवृत्तेः पुनर्स्थापनकारणात् हिमाचलप्रदेशे बहवः आर्थिकप्रतिबन्धाः स्थापिताः, परन्तु तदपि राज्यसर्वकारः स्वास्थ्यसेवापरिष्कारार्थं प्रयत्नाः कुर्वन् अस्ति। सः अवदत् यत् रोगिणः सर्वदा चिकित्सायाः आशां कृत्वा चिकित्सालयं आगच्छन्ति, एतादृश्यां परिस्थितौ यदि वैद्यः तैः सह सुन्दररीत्या वार्तालापं करोति तर्हि तेषां दुःखं न्यूनीकरिष्यते। वैद्यैः स्वव्यवहारं परिवर्तयितुं आवश्यकता वर्तते।

# DGP HIMACHAL- श्यामभगत नेगी अथवा तिवारी, हिमाचलस्य नूतनः पुलिसमहानिदेशकः कः?




**हिमसंस्कृतवार्ताः- शिमला।** विमलनेगीप्रकरणस्य सीबीआई-समीपे गमनेन नूतन- डीजीपी- प्रकरणस्य स्पर्धा आरब्धा। मुख्यसचिवः अस्य पदस्य नूतनं समूहं मुख्यमन्त्रीकार्यालयं प्रति प्रेषितवान्। अस्मिन् वरिष्ठतमस्य IPS श्यामभगतनेगी इत्यस्य नाम अपि अन्तर्भवति। १९९१ तमे वर्षस्य वर्गस्य आईपीएस-अधिकारी श्यामभगतनेगी सम्प्रति भारतसर्वकारे प्रतिनियुक्तौ अस्ति, मन्त्रिमण्डलसचिवालये अपरसचिवरूपेण च नियुक्तः अस्ति। गृहविभागेन डीजीपङ्क्तौ उपस्थितानां सर्वेषाम् अधिकारिणां नाम अग्रे प्रेषितम्, परन्तु एतेषु केवलं द्वयोः अधिकारिणोः सहमतिः सञ्चिकायां वर्तते, येषु एकः श्यामभगतनेगी अस्ति। अतः सः इदानीं प्रबलः प्रतियोगी इति गण्यते। नेगी इत्यस्य अतिरिक्तं १९९३ वर्गस्य आईपीएस अधिकारी अशोक तिवारी तथा १९९४ वर्गस्य आईपीएस अधिकारी राकेश अग्रवालः इत्येतयोः नाम अपि विचारणीयः भवति। अधुना राज्यसर्वकारः केन्द्रीयलोकसेवा-आयोगेन सह परामर्शं कृत्वा नूतनस्य पुलिसमहानिदेशकस्य विषये अन्तिमनिर्णयं करिष्यति। एतेषु त्रिषु आईपीएस-अधिकारिषु केवलं १९९३ वर्गस्य अशोकतिवारी एव सम्प्रति हिमाचले अस्ति। १९९० वर्गस्य श्याम भगतनेगी, १९९४ वर्गस्य च आईपीएस अधिकारी राकेश अग्रवालः सम्प्रति केन्द्रीयप्रतिनिधित्वे सन्ति। परन्तु तपनकुमार डेका, एस. आर. ओझा च श्याम भगत नेगी इत्यस्मात् वरिष्ठाः सन्ति। डेका इत्यस्य आईबी-मध्ये एव विस्तारः प्राप्तः, एस. आर. ओझा चतुर्दिनानाम् अनन्तरं अर्थात् ३१ मई दिनाङ्के सेवानिवृत्तः भविष्यति यत्र आईपीएस- अधिकारी श्यामभगतनेगी २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्के निवृत्तः भविष्यति। एतादृश्यां परिस्थितौ यदि राज्यसर्वकारः श्यामभगतनेगीं डीजीपीं करोति तर्हि सः १० मासान् यावत् राज्यस्य डीजीपी एव तिष्ठति। वर्तमान डीजीपी डॉ. अतुल वर्मा अपि मई ३१ दिनाङ्के निवृत्तः भविष्यति। सर्वोच्चन्यायालयस्य आदेशानुसारं २ वर्षयोः कार्यकालः दातुं सञ्चिका लम्बिता आसीत्, यस्मिन् विषये कोऽपि निर्णयः कर्तुं न शक्यते स्म।

# भारतस्य गुलवीर-सिंहेन दक्षिण कोरियायाः गुमीनगरे स्वर्ण-पदकं अधिगतः



हिमसंस्कृतवार्ताः। भारतस्य गुलवीर-सिंहेन दक्षिण कोरियायाः गुमीनगरे एशियाई एथलेटिक्स चैंपियनशिप-इत्येतस्यां स्पर्धायां पुरुष-वर्गस्य दससहस्र मीटरमितस्य धावन-प्रतियोगितायां स्वर्ण पदकम् अधिगतः। गुलवीरेण अष्टविंशतिः निमेषपरिमितस्य समयमालक्ष्य शीर्ष स्थानं अधिगतम्। इतः पूर्वं सेर्विन-सेबेस्टियन इत्येषः अस्यां स्पर्धायां कांस्य पदकं विजितमासीत् ।

# भारतीयमहाविद्यालये एकदिवसीया राष्ट्रियगोष्ठी सुसम्पन्ना

## "विकसितभारतस्य निर्माणे संस्कृतसाहित्यस्य भूमिका" इति विषये संगोष्ठ्यां चर्चा अभवत्

### संस्कृतेन एव वयं "विकसितभारतस्य दृष्टिः" इति लक्ष्यं प्राप्तुं शक्नुमः राजेन्द्रकुमारत्रिपाठी




**हिमसंस्कृतवार्ताःआचार्यदीनदयालशुक्लः, फर्रुखाबाद।** उत्तरप्रदेशसंस्कृतसंस्थानं, लखनऊ तथा IQAC, संस्कृतविभागस्य, भारतीयमहाविद्यालयस्य, फर्रुखाबादस्य च संयुक्ताश्रयेण भव्या एकदिवसीया राष्ट्रियगोष्ठी आयोजिता। संगोष्ठ्याः विषयः आसीत्- "विकसितभारतस्य निर्माणे संस्कृतसाहित्यस्य भूमिका" इति। एतत् आयोजनं भारतीयमहाविद्यालयस्य सभागारे सम्पन्ना, यस्यां विभिन्नप्रदेशेभ्यः विद्वांसः, प्राध्यापकाः, शोधकर्त्ताः, छात्राः च भागं गृहीतवन्तः। कार्यक्रमस्य मुख्यातिथिः राजेन्द्रकुमारत्रिपाठी (अध्यक्षः, प्रबंधनसमितिः, भारतीयमहाविद्यालयः)। कार्यक्रमस्य अध्यक्षता महाविद्यालयस्य प्राचार्यः डॉ. रमणप्रकाशः, मुख्यवक्ता प्रो. (डॉ.) प्रदीपकुमारदीक्षितः, संयोजकः, संस्कृत, छत्रपतिशाहूजीमहाराजविश्वविद्यालयः कानपुरं विशेषवक्ता डॉ. मिताली (सहायकप्राध्यापकः, लक्ष्मीयदुनानन्दन-महाविद्यालयः, कायमगंज); विशेष अतिथिः डॉ. सर्वेशकुमारशाण्डिल्यः (सहायकप्राध्यापकः, संस्कृतविभागः, दयानन्दवैदिकमहाविद्यालयः, ओरई, जालौन), अतिथिषु डॉ. अर्चना पाण्डेया (बद्रीविशालपीजी महाविद्यालयः), वीरेन्द्रकुमारमिश्रः (सेवानिवृत्त, व्याख्याता, इण्टरकॉलेज), रंजनसक्सेना (संस्कृताध्यापिका, सरस्वतीविद्यामन्दिरं, फर्रुखाबाद) इत्यादयः समागताः।मुख्यवक्ता प्रो. (डॉ.) प्रदीपकुमारदीक्षितः स्वव्याख्याने उक्तवान् यत् २०४७ तमवर्षपर्यन्तं भारतस्य विकासाय अस्माकं सर्वेषां योगदानं दातव्यम्। सः अवदत् यत् संस्कृतसाहित्यं वैश्विकरूपेण अस्माकं भारतीयसभ्यता, संस्कृतिः, परम्परा, शास्त्रज्ञानं, शिक्षणपरम्परा, आध्यात्मिकशक्तिः इत्यादयः इति स्वीक्रियते। यतो हि विश्वे ज्ञानं मार्गदर्शनं च दत्त्वा वयं विश्वगुरु इति उच्यन्ते। अनुशासनेन सह योग-आयुर्वेदयोः अपि प्रकाशं क्षिपत्। संगोष्ठ्यां विशेषातिथिरूपेण डॉ. मिताली संस्कृतसाहित्यस्य सर्वेषां परिचयं कुर्वन् सर्वेभ्यः वेद- वेदाङ्ग- उपनिषद- दर्शन- पुराण- साहित्य- संस्कृत- साहित्य- आदिविषये विस्तरेण कथयन्ती "वसुधैव कुटुम्बकम्" इत्यस्य भावना विश्वसमुदायस्य कृते सहायका इति च अवदत्।विशेषातिथिरूपेण डॉ. सर्वेशकुमारशाण्डिल्यः (सहायकप्राध्यापकः, संस्कृतविभागः, दयानन्दवैदिकमहाविद्यालयः, ओराई) स्वागतसम्बोधनं दत्त्वा विषयं परिवर्तयन् अन्ये वक्तारः विषयं विविधपरिमाणैः समृद्धं कृतवन्तः। राष्ट्रपतिसम्बोधने डॉ. रमणप्रकाशः अवदत् यत् आधुनिककाले संस्कृतिक्षयः, मूल्यानां दुर्बलता, मूल्यानां क्षरणं च दृश्यते। अतः २०४७ तमवर्षपर्यन्तं भारतस्य विकासः करणीयः इति दृष्ट्या समाजे सहचर्यस्य निर्माणस्य आवश्यकता वर्तते। तदा एव वयं "विकसितभारतस्य दृष्टिः" इति लक्ष्यं प्राप्तुं शक्नुमः। सः एतादृशानां घटनानां निरन्तरतायां बलं दत्तवान्। मुख्यातिथिः अवदत् यत् संस्कृतविभागेन आयोजिता एषा संगोष्ठी महाविद्यालयस्य छात्राणां कृते उपयोगी सिद्धा भविष्यति। यस्य कृते विभागः अभिनन्दनम् अर्हति। तथैव भविष्ये अपि महाविद्यालये सारस्वतकार्यक्रमाः निरन्तरं भवेयुः। उत्तरप्रदेशसंस्कृतसंस्थानतः प्रतिनिधिः वामदेवसंस्कृतमहाविद्यालयः बाँदायाः व्याकरणविभागस्य सहायकप्रमुखः डॉ. रत्नेशकुमारत्रिवेदी आसीत्। संगोष्ठ्याः संचालनसचिवः डॉ.संदीपकुमारद्विवेदी (सहायकप्रोफेसरः, संस्कृतविभागः) कृतः। डॉ. समीर कुमार गुप्ता सहसचिवः आसन्। डॉ. धनंजयकुशवाहा गोष्ठ्यां संवाददाता आसीत्। अन्ते सर्वेषाम् अतिथिनां वक्तृणां च वस्त्रेण, स्मृतिचिह्नैः च सम्मानितः, प्रतिभागिभ्यः प्रमाणपत्राणि च प्रदत्तानि। आयोजनम् अतीव सफलं प्रभावी च अभवत्। अवसरेऽस्मिन् महाविद्यालयस्य प्राध्यापकाः डॉ. निधिशकुमारसिंहः, प्राचीगोस्वामी, डॉ. नीरजद्विवेदी, डॉ. रामाशंकरपाण्डेयः, डॉ. मधुपकुमारः, शोधविद्वान् योगेश अवस्थी एवं छात्राः उपस्थिताः आसन्।

## पहाड़ी गल्लां, हिमसंस्कृतवार्ताः

### जीभे तू मत गलाया कर तुहतरताळ

जीभे तू मत गलाया कर तुहतरताळ
अपूं बड़ी जाईं अंदर कने छित्तर खाँदा कपाळ
स्वादा रे चक्करा च माहणु ज्यादा खाई जांदा
पर भरदी नी कदी बी तिसरी गरनाळ

गोडे जुड़ी जांदे तांजे तां कियां चढ़ना क्वाळ
इक्की छिंजा च अक पाई कने दसदे थे दुजिया रा सवाल
अज्जकल फ़टी रियाँ जीना पहनया करदिया कुड़ियां
पहले जे पौंचा भी चौड़ा हुँदा था तां मची जांदा था ववाळ

कितेखा बी देखी लवा जित्थी बी देखो हुन्दी लड़ाई
चुप नी रहन्दी जीभ इसे ई हुन्दी छिंज कुळवाई
प्यार भाव नी रहया बधिया रिश्ते करी दित्ते खराब
क्या दसिये इसे जीभे कईयाँ रे घरें अग्ग संटाईं

क्या बोलिये एह खसमखाणी उल्टा सीधा ग्लान्दी
खाणे जो बी टोळदी चटपटा मसालेदार कने स्वाद
जे बोलो प्रभु रा नांव जप तां एह मच्छरी जांदी
स्वादा रे चक्करा च माहणुये री सेहत करी ती बर्बाद

चुगली लाणे जो बड़ी होशियार हर कुछ ग्लान्दी
बेइज्जती करवांदी सै लग्ग कने छित्तर होर पवांदी
सच्चेयाँ री जीभ झुठ बोलणे ते बड़ा घबरान्दी
झुठेयाँ री तां झूठ बोलणे जो हमेशा फडफडांदी

जे मीठी होवे जीभ तां सबीं जो अपणा बणान्दी
बुरा नी सैजे भुली कने बी किसी जो कदी नी ग्लान्दी
जीभा रे पाइरे पवाड़े कोई नी समझी सकदा
तिस पर जे बीतदि एह तिसजो ई समझ औंदी

**रवींद्र कुमार शर्मा,घुमारवीं**
जिला बिलासपुर हि प्र
7018853800



# शैक्षणिकप्रशासनस्य सफलतायै कार्यालयव्यवस्थायाः अनुसरणं आवश्यकम्- डॉ. हरिमोहन आजादः




हिमसंस्कृतवार्ताः देवप्रयागः। केन्द्रीयसंस्कृतविश्वविद्यालयश्रीरघुनाथकीर्तिपरिसरस्य मुख्यालये अष्टदशीयोजनायां "शैक्षिकप्रशासनस्य मौलिकसिद्धान्ताः व्यवहाराः च" इति विषये आयोजितस्य दशदिवसीयस्य आवासीयप्रशिक्षणसहसंकायविकास-कार्यक्रमस्य (FDP) समापनसमारोहः गतसोमवासरे अभवत्। समापनसमारोहस्य मुख्यातिथिः राष्ट्रियप्रौद्योगिकीसंस्थानस्य श्रीनगरगढ़वालस्य रजिस्ट्रारः डॉ. हरिमोहन आजादः, विशेषातिथिः च दिल्लीविश्वविद्यालयस्य सेण्ट् स्टीफन् महाविद्यालयस्य संस्कृतविभागप्रमुखः प्रो.पंकजमिश्रः आसीत् । कार्यक्रमस्य अध्यक्षता परिसरनिदेशकः प्रो.पी.वी.बी. सुब्रह्मण्यम् । संयोजकेन डॉ. सच्चिदानंदस्नेही वर्येण प्रतिवेदनं प्रस्तुतम्। अस्मिन् दशदिवसीयकार्यक्रमे ८० व्याख्यानानि प्रतिभागिप्रस्तुतयः च अभवन् । मुख्यातिथिः हरिमोहन आजादः अवदत् यत् शैक्षणिकप्रशासनस्य सफलतायै कार्यालयव्यवस्थायाः अनुसरणं आवश्यकम्। अपि च सर्वाभिलेखाः संगठितरूपेण स्थापनीयाः यतोहि सूचनाधिकारकानून २००५ अन्तर्गतं जनमहत्त्वस्य सूचनां प्रदातुं अनिवार्यम् अस्ति।कार्यक्रमस्य विशेषातिथिः पंकजकुमारमिश्रः अवदत् यत् अस्यां कार्यशालायां व्याख्याताः शैक्षिकप्रशासनस्य मूलभूतसिद्धान्ताः व्यावहारिकप्रयोगाः च स्वकीयसंस्थायां प्रचारिताः भवेयुः तथा च संस्थायाः विकासे योगदानं दातव्यम्। शैक्षणिकप्रशासने छात्रकेन्द्रितक्रियाकलापानाम् प्राधान्यं दातव्यम्। तेन रगिंगविरोधी, मादकद्रव्योन्मूलन, आपदा प्रबन्धनेत्यादि विषयेषु प्रतिपादनं कृतम्।कार्यक्रमस्य संचालनं ज्योतिषविद्या शाखास्य सहायकप्राध्यापकेन रजतगौतमेन कृतम्। धन्यवाद ज्ञापनं व्याकरणविभागस्य सहायकप्राध्यापक मनीषशर्मा इत्यनेन कृतम्। सर्वेषां अतिथिनां प्रतिभागिनां च प्रमाणपत्रैः सम्मानः कृतः। नवदिल्लीनगरस्य गार्गीमहाविद्यालयात् संस्कृतविभागस्य सहायिका प्राध्यापिका ममता त्रिपाठी कार्यक्रमविषये स्वस्य अनुभवं सार्वजनिकं कुर्वन्ती अस्यां कार्यशालायां व्यवस्थाः उत्तमाः इति उक्तवती। अस्याः कार्यशालायाः माध्यमेन अस्माभिः शैक्षिकप्रशासनसम्बद्धेषु अनेकेषु नवीनविषयेषु प्रशिक्षणं प्राप्तम् यथा मौलिकनियमाः, पूरकनियमाः, वित्तीयनियमाः, सूचनायाः अधिकारः अधिनियमः २००५, वित्तीयप्रबन्धनम्, सूक्ष्मकौशलविकासः इत्यादि परिसरनिदेशकः प्राध्यापकः पी.वी.बी. सुब्रह्मण्यमः अपि अस्मिन् अवसरे शैक्षणिकप्रशासनस्य अनुभवं कथितवान्। कार्यशालायां देशस्य सर्वेभ्यः भागेभ्यः ३७ प्रतिभागिनः भागं गृहीतवन्तः। कार्यक्रमस्य अवसरे परिसरस्य शिक्षकाः सहभागिनः छात्राः च उपस्थिताः आसन्। समापनसत्रं शान्तिपाठेन समाप्तम्। संयोजकः डॉ. सच्चिदानन्द स्नेही इत्यनेन कार्यक्रमस्य सफलतायाः श्रेयः परिसरस्य सर्वेभ्यः शिक्षकेभ्यः, प्रतिभागिभ्यः, कर्मचारिभ्यः, छात्रेभ्यः च दत्तः येषां योगदानेन कार्यक्रमः सफलः अभवत्।

# दक्षिणस्य नायकस्य प्रभासस्य 'द राजा साहब' चलच्चित्रम् शीघ्रमेव प्रसारितं भविष्यति



हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई

कल्कि २८९८ एडी इत्यस्य प्रदर्शनानन्तरं तत्क्षणमेव दक्षिणस्य नायकः प्रभासः स्वस्य भयानकहास्यचलच्चित्रस्य 'द राजा साहेब' इत्यस्य चित्रोतलनम् आरब्धवान्। चित्रोतलनमध्ये एव चलच्चित्रस्य प्रदर्शनस्य तिथिः अपि घोषिता। एतत् चलच्चित्रम् अप्रैलमासस्य १० दिनाङ्के प्रदर्शितं भवितुम् आसीत्। परन्तु सहसा निर्मातारः चलच्चित्रस्य प्रदर्शनस्य तिथिं स्थगितवन्तः। समाचारानुसारं चित्रोतलनं समये न सम्पन्नं, वीएफएक्स-कार्यं न सम्पन्नं च इति कारणेन चलच्चित्रं स्थगितम्। एतस्य चित्रोतलनं कृत्वा प्रभासः 'फौजी' चलच्चित्रस्य कृते चित्रोतलनं कर्तुं व्यस्तः अभवत्। 'फौजी' इत्यस्य चित्रोतलन-काले प्रभासः क्षतिग्रस्तः अभवत्, अतः 'द राजा साहेब' इत्यस्य चित्रोतलन-कार्यं विलम्बितम्। एतादृशे निर्मातारः समये एव चित्रोतलनं सम्पन्नं कर्तुं न शक्तवन्तः। समाचारानुसारं 'द राजा साहब' इति चलच्चित्रम् अद्यापि सम्पन्नं न जातम्। परन्तु तावत्पर्यन्तं चलच्चित्रस्य विमोचनसम्बद्धं महती वार्ता आगता। न्यूज १८ इत्यस्य वार्तानुसारं निर्मातारः 'द राजा साहेब' इति भयानकहास्यचलच्चित्रं दिसम्बरमासे प्रदर्शितुं योजनां कुर्वन्ति। प्रभासस्य 'द राजा साहब' इति चलच्चित्रं २०२५ तमस्य वर्षस्य दिसम्बरमासस्य ५ दिनाङ्के प्रदर्शितुं शक्नोति। अस्य आधिकारिकघोषणा अतीव शीघ्रमेव कर्तुं शक्यते। प्रदर्शनस्य तिथेः घोषणया सह अस्य चलच्चित्रस्य विज्ञापन पुटकम् अपि अतीव शीघ्रमेव प्रदर्शितुं शक्यते।

# डॉ. चन्द्रमोहनबड़थ्वालः स्वमातुः चिरस्मृत्यर्थं पञ्चविंशति-सहस्ररूप्यकाणां धनराशिपत्रं दिव्यांगछात्रेभ्यः दत्तवान्

## गेप्स एवं देवभूमि-उत्कर्षसेवासमितिः इत्यनयोः संरक्षकोऽस्ति श्रीबडथ्वालः

हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला।

भारतीदेवीशैक्षिकन्यासेन झण्डीचौड़- कण्वनगरीकोटद्वारे मानसिक- शारीरिक- दिव्याङ्गबालकानां कल्याणार्थं आयोजनं कृतम्। अस्मिन् पुण्यकार्यक्रमे गेप्स तथा देवभूमि- उत्कर्षसेवासंस्थयोः संरक्षकः डॉ. चन्द्रमोहनबड़थ्वालः स्वमातुः चिरस्मृत्यर्थं आयोज्य संस्थायाः संस्थापकाय कमलेशमहाभागाय पञ्चविंशतिसहस्ररूप्यकाणां धनराशिपत्रं दानं कृतवान्। कार्यक्रमस्य अध्यक्षता डॉ. रमाकान्त कुकरेतिना कृतम्। मुख्यातिथेः रूपेण "सक्षमसंख्या" संस्थायाः अध्यक्षः योगम्बरसिंहरावतः उपस्थितः आसीत्। संरक्षकः डॉ. बड़थ्वालः दिव्याङ्गसंस्थायाः संचालिकायाः रिनीलखेड़ावर्यायाः कृते स्वनिबद्धां नामाक्षरीकवितां पाठयित्वा तां समर्पितवान्। संस्थायां कार्यरताः शिक्षिकाः सेवाभावेन सततम् अस्मिन पुण्ये कार्ये नियोजिताः सन्ति। ततः मुख्यातिथिना रावतमहाभागेन उक्तं यत् यथा गेप्स तथा देवभूमि-उत्कर्षसेवासमितिः कार्यं कुर्वन्तौ स्तः, तथा अन्याः अपि संस्थाः अग्रे आगच्छेयुः। एतेन दिव्याङ्गबालकानां सर्वतोन्मुखं कल्याणं साधयेत्। विशेषातिथिरूपेण कर्नल बुद्धिबल्लभध्यानिना स्वसंबोधने



उक्तं यत् सर्वेषु दिव्याङ्गबालकेषु तादृशी प्रतिभाः विकासनीयाः यथा ते आत्मनिर्भराः स्युः। कार्यक्रमस्य संचालनं मनमोहनकाला द्वारा कृतम्। सः गेप्स् तथा देवभूमि-उत्कर्षसेवासमित्यौ विषये वदन् अवदत् यत् एते संस्थाः पर्यावरणरक्षणे, नशानिवृत्तौ, वृक्षारोपणे च, गरीबबालकानां हिताय कार्यं कुर्वन्ति। विद्यालयं गत्वा अपि सामान्यज्ञानपरीक्षाः आयोज्य, विजेतृभ्यः प्रथमे स्थाने २१०० रूप्यकाणि, द्वितीये स्थाने १५०० रूप्यकाणि, तृतीये स्थाने ११०० रूप्यकाणि ददति। एतेषां परीक्षा द्वारा छात्राणां सामान्यज्ञानं वर्धते। अन्ते अध्यक्षीयोद्बोधने डॉ. रमाकान्तकुकरेतिना उक्तं यत् दिव्याङ्गबालकानाम् उन्नत्यर्थं समाजे सर्वे जनाः अग्रे आगच्छेयुः, यत् ते अपि समाजस्य मुख्यधारायां सम्मिलन्तु। अस्मिन् सन्दर्भे अभियन्ता जगतसिंहरावतः, सांस्कृतिकप्रभारी रेखाध्यायिनी च अन्ये च बहवः गण्यमानव्यक्तयः उपस्थिताः आसन्।

# "लौकिकन्यायकोशः"

## "जलतरङ्गन्यायः"

वायोः वेगवशात् जलाशये जलस्य उपरि लहर्यः उत्पद्यन्ते। तेन जले जलं, लहर्यः, फेनम् इति विविधं नवीनं च परिवर्तनं जातमिव भाति। तेषु सर्वेषु अपि जलगताः धर्माः एव भवन्ति। रूपस्य परिवर्तने अपि धर्मपरिवर्तनं न भवति। एवं कस्मिन्नपि पदार्थे जातानि परिवर्तनानि मूलद्रव्यपेक्षया भिन्नानि न भवन्तीति अनेन न्यायेन सूच्यते। पश्यन्तु-

**माधुर्यद्रवशैत्यादिनीरधर्मास्तरङ्गके।**
**अनुपम्याथ तमिष्टे फेनेऽप्यनुगता यथा।।**

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्

# हास्यकणिका

## पत्युः आत्मकथा

- पतिः- अद्य सप्तवर्षात् पूर्वं अहम् "ऑपरेशन सिंदूरं" कृतवान्। अद्य पर्यंतं मम उपरि विपरीतरूपेण आक्रमणम् भवति।
- मनुष्यं सदैव प्रसन्नः भवेत्। कारणम्- "ऐभ्याः/ हस्तिघोषालताफलस्य" (टिंडा) समानं मुखं निर्मीय समाधानं न लब्धम्।
- अस्माकं भारते पत्या पतिः एव सर्वस्वम् इति तु मन्यते केवलं तस्य आदेशः न मन्यते।